अथ शिवमहापुराणे द्वितीया रुद्रसंहिता प्रारभ्यते

श्रीगणेशाय नमः

श्रीगौरीशंकराभ्यां नमः

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
गौरीपतिं विदिततत्त्वमनन्तकीर्तिम् ।
मायाश्रयम्विगतमायमचिंत्यरूपम्
बोधस्वरूपममलं हि शिवन्नमामि १
वन्दे शिवन्तम्प्रकृतेरनादिम्प्रशान्तमेकम्पुरुषोत्तमं हि
स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदन्तर्बहिरास्थितो यः २
वन्देतरस्थं निजगूढरूपं शिवंस्वतस्स्त्रष्टुमिदम्विचष्टे
जगन्ति नित्यम्परितो भ्रमंति यत्सन्निधौ चुम्बकलोहवत्तम् ३
व्यास उवाच
जगतः पितरं शम्भुञ्जगतो मातरं शिवाम्
तत्पुत्रञ्च गणाधीशन्नत्वैतद्वर्णयामहे ४
एकदा मुनयस्सर्वे नैमिषारण्य वासिनः
पप्रच्छुर्वरया भक्त्या सूतन्ते शौनकादयः ५
ऋषय ऊचुः
विद्येश्वरसंहितायाः श्रुता सा सत्कथा शुभा
साध्यसाधनखंडा ख्यारम्याद्या भक्तवत्सला ६
सूत सूत महाभाग चिरञ्जीव सुखीभव
यच्छ्रावयसि नस्तात शांकरीं परमां कथाम् ७
पिबन्तस्त्वन्मुखाम्भोजच्युतं ज्ञानामृतम्वयम्
अवितृप्ताः पुनः किंचित्प्रष्टुमिच्छामहेऽनघ ८
व्यासप्रसादात्सर्वज्ञो प्राप्तोऽसि कृतकृत्यताम्
नाज्ञातम्विद्यते किंचिद्भूतं भव्यं भवच्च यत् ९

गुरोर्व्यासस्य सद्भक्त्या समासाद्य कृपां पराम्
सर्वं ज्ञातं विशेषेण सर्वं सार्थं कृतं जनुः १०
इदानीं कथय प्राज्ञ शिवरूपमनुत्तमम्
दिव्यानि वै चरित्राणि शिवयोरप्यशेषतः ११
अगुणोगुणतां याति कथं लोके महेश्वरः
शिवतत्त्वं वयं सर्वे न जानीमो विचारतः १२
सृष्टेः पूर्वं कथं शंभुस्स्वरूपेणावतिष्ठते
सृष्टिमध्ये स हि कथं क्रीडन्संवर्त्तते प्रभुः १३
तदन्ते च कथन्देवस्स तिष्ठति महेश्वरः
कथम्प्रसन्नतां याति शंकरो लोकशंकरः १४
स प्रसन्नोमहेशानः किं प्रयच्छति सत्फलम्
स्वभक्तेभ्यः परेभ्यश्च तत्सर्वं कथयस्व नः १५
सद्यः प्रसन्नो भगवान्भवतीत्यनुशुश्रुम
भक्तप्रयासं स महान्न पश्यति दयापरः १६
ब्रह्मा विष्णुर्महेशश्च त्रयो देवाश्शिवांगजाः
महेशस्तत्र पूर्णांशस्स्वयमेव शिवोऽपरः १७
तस्याविर्भावमाख्याहि चरितानि विशेषतः
उमाविर्भावमाख्याहि तद्विवाहं तथा प्रभो १८
तद्गार्हस्थ्यं विशेषेण तथालीलाः परा अपि
एतत्सर्वं तदन्यच्च कथनीयं त्वयाऽनघ १९
व्यास उवाच
इति पृष्टस्तदा तैस्तु सूतो हर्षसमन्वितः
स्मृत्वा शंभुपदां भोजम्प्रत्युवाच मुनीश्वरान् २०
सूत उवाच
सम्यक्पृष्टं भवद्भिश्च धन्या यूयं मुनीश्वराः

सदाशिवकथायां वो यज्ञाता नैष्ठिकी मतिः २१
सदाशिवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि
वक्तारं पृच्छकं श्रोतृञ्जाह्नवीसलिलं यथा २२
शंभोर्गुणानुवादात्कोविरज्येत पुमान्द्विजाः
विना पशुघ्नं त्रिविधजनानन्दकरात्सदा २३
गीयमानो वितृष्णैश्च भवरोगौषधोऽपि हि
मनःश्रोत्राभिरामश्च यत्तस्सर्वार्थदस्स वै २४
कथयामि यथाबुद्धि भवत्प्रश्नानुसारतः
शिवलीलां प्रयत्नेन द्विजास्तां शृणुतादरात् २५
भवद्भिः पृच्छ्यते यद्वत्तत्तथा नारदेन वै
पृष्टं पित्रे प्रेरितेन हरिणा शिवरूपिणा २६
ब्रह्मा श्रुत्वा सुतवचश्शिवभक्तः प्रसन्नधीः
जगौ शिवयशः प्रीत्या हर्षयन्मुनिसत्तमम् २७
व्यास
सूतोक्तमिति तद्वाक्यमाकर्ण्य द्विजसत्तमाः
पप्रच्छुस्तत्सुसंवादं कुतूहलसमन्विताः २८
ऋषय ऊचुः
सूत सूत महाभाग शैवोत्तम महामते
श्रुत्वा तव वचो रम्यं चेतो नस्सकुतूहलम् २९
कदा बभूव सुखकृद्विधिनारदयोर्महान्
संवादो यत्र गिरिशसुलीला भवमोचिनी ३०
विधिनारदसंवादपूर्वकं शांकरं यशः
ब्रूहि नस्तात तत्प्रीत्या तत्तत्प्रश्नानुसारतः ३१
इत्याकर्ण्य वचस्तेषां मुनीनां भावितात्मनाम्
सूतः प्रोवाच सुप्रीतस्तत्संवादानुसारतः ३२

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखंडे
सृष्ट्युपाख्याने मुनिप्रश्नवर्णनो नाम प्रथमोऽध्यायः १
सूत उवाच
एवस्मिन्समये विप्रा नारदो मुनिसत्तमः
ब्रह्मपुत्रो विनीतात्मा तपोर्थंमन आदधे १
हिमशैलगुहा काचिदेका परमशोभना
यत्समी पेसुरनदी सदा वहति वेगतः २
तत्राश्रमो महादिव्यो नानाशोभासमन्वितः
तपोर्थं स ययौ तत्र नारदो दिव्यदर्शनः ३
तां दृष्ट्वा मुनिशार्दूलस्तेपे स सुचिरं तपः
बध्वासनं दृढं मौनी प्राणानायम्य शुद्धधीः ४
चक्रे मुनिस्समाधिं तमहम्ब्रह्मेति यत्र ह
विज्ञानं भवति ब्रह्मसाक्षात्कारकरं द्विजाः ५
इत्थं तपति तस्मिन्वै नारदे मुनिसत्तमे
चकंपेऽथ शुनासीरो मनस्संतापविह्वलः ६
मनसीति विचिंत्यासौ मुनिर्मे राज्यमिच्छति
तद्विघ्नकरणार्थं हि हरिर्यत्नमियेष सः ७
सस्मार स्मरं शक्रश्चेतसा देवनायकः
आजगाम द्रुतं कामस्समधीर्महिषीसुतः ८
अथागतं स्मरं दृष्ट्वा संबोध्य सुरराट् प्रभुः
उवाच तं प्रपश्याशु स्वार्थे कुटिलशेमुषिः ९
इन्द्र उवाच
मित्रवर्य्य महावीर सर्वदा हितकारक
शृणु प्रीत्या वचो मे त्वं कुरु साहाय्यमात्मना १०
त्वद्बलान्मे बहूनाञ्च तपोगर्वो विनाशितः

मद्राज्यस्थिरता मित्र त्वदनुग्रहतस्सदा ११
हिमशैलगुहायां हि मुनिस्तपति नारदः
मनसोद्दिश्य विश्वेशं महासंयमवान्दृढः १२
याचेन्न विधितो राज्यं स ममेति विशंकितः
अद्यैव गच्छ तत्र त्वं तत्तपोविघ्नमाचर १३
इत्याज्ञप्तो महेन्द्रेण स कामस्समधु प्रियः
जगाम तत्स्थलं गर्वादुपायं स्वञ्चकार ह १४
रचयामास तत्राशु स्वकलास्सकला अपि
वसंतोपि स्वप्रभावं चकार विविधं मदात् १५
न बभूव मुनेश्चेतो विकृतं मुनिसत्तमाः
भ्रष्टो बभूव तद्गर्वो महेशानुग्रहेण ह १६
शृणुतादरतस्तत्र कारणं शौनकादयः
ईश्वरानुग्रहेणात्र न प्रभावः स्मरस्य हि १७
अत्रैव शम्भुनाऽकारि सुतपश्च स्मरारिणा
अत्रैव दग्धस्ते नाशु कामो मुनितपोपहः १८
कामजीवनहेतोर्हि रत्या संप्रार्थितैस्सुरैः
सम्प्रार्थित उवाचेदं शंकरो लोकशंकरः १९
कंचित्समयमासाद्य जीविष्यति सुराः स्मरः
परंत्विह स्मरोपायश्चरिष्यति न कश्चन २०
इह यावद्दृश्यते भूर्जनैः स्थित्वाऽमरास्सदा
कामबाणप्रभावोत्र न च लिष्यत्यसंशयम् २१
इति शंभूक्तितः कामो मिथ्यात्मगतिकस्तदा
नारदे स जगामाशु दिवमिन्द्रसमीपतः २२
आचख्यौ सर्ववृत्तांतं प्रभावं च मुनेः स्मरः
तदाज्ञया ययौ स्थानं स्वकीयं स मधुप्रियः २३

विस्मितोभूत्सुराधीशः प्रशशंसाथ नारदम्
तद्वृत्तां तानभिज्ञो हि मोहितश्शिवमायया २४
दुर्ज्ञेया शांभवी माया सर्वेषां प्राणिनामिह
भक्तं विनार्पितात्मानं तया संमोह्यते जगत् २५
नारदोऽपि चिरं तस्थौ तत्रेशानुग्रहेण ह
पूर्णं मत्वा तपस्तत्स्वं विरराम ततो मुनिः २६
कामाज्जयं निजं मत्वा गर्वितोऽभून्मुनीश्वरः
वृथैव विगतज्ञानश्शिवमायाविमोहितः २७
धन्या धन्या महामाया शांभवी मुनिसत्तमाः
तद्गतिं न हि पश्यंति विष्णुब्रह्मादयोपि हि २८
तया संमोहितोतीव नारदो मुनिसत्तमः
कैलासं प्रययौ शीघ्रं स्ववृत्तं गदितुंमदी २९
रुद्रं नत्वाब्रवीत्सर्वं स्ववृत्तङ्गर्ववान्मुनिः
मत्वात्मानं महात्मानं स्वप्रभुञ्चस्मरञ्जयम् ३०
तच्छ्रुत्वाशंकरः प्राह नारदं भक्तवत्सलः
स्वमायामोहितं हेत्वनभिज्ञं भ्रष्टचेतसम् ३१
रुद्र उवाच
हे तातनारद प्राज्ञधन्यस्त्वं शृणु मद्वचः
वाच्यमेवं नकुत्रापि हरेरग्रेविशेषतः ३२
पृच्छमानोऽपि न ब्रूयाः स्ववृत्तं मे यदुक्तवान्
गोप्यंगोप्यं सर्वथाहि नैववाच्यं कदाचन ३३
शास्म्यहं त्वांविशेषेण मम प्रियतमोभवान्
विष्णुभक्तो यतस्त्वं हि तद्भक्तो तीवमेऽनुगः ३४
शास्तिस्मेत्थञ्च बहुशो रुद्रस्सूतिकरः प्रभुः
नारदोनहितं मेनेशिवमायाविमोहितः ३५

प्रबलाभाविनी कर्मगतिर्ज्ञेयाविचक्षणैः
ननिवार्याजनैः कैश्चिदपीच्छासैवशांकरी ३६
ततस्स मुनिवर्यो हि ब्रह्मलोकं जगामह
विधिं नत्वाऽब्रवीत्कामजयं स्वस्य तपोबलात् ३७
तदाकर्ण्य विधिस्सोथ स्मृत्वा शम्भुपदाम्बुजम्
ज्ञात्वा सर्वं कारणं तन्निषिषेध सुतं तदा ३८
मेने हितन्न विध्युक्तं नारदो ज्ञानिसत्तमः
शिवमायामो हि तश्च रूढचित्तमदांकुरः ३९
शिवेच्छा यादृशी लोके भवत्येव हि सा तदा
तदधीनं जगत्सर्वं वचस्तंत्यांत स्थितं यतः ४०
नारदोऽथ ययौ शीघ्रं विष्णुलोकं विनष्टधीः
मदांकुरमना वृत्तं गदितुं स्वं तदग्रतः ४१
आगच्छंतं मुनिन्दृष्ट्वा नारदं विष्णुरादरात्
उत्थित्वाग्रे गतोऽरं तं शिश्लेषज्ञातहेतुकः ४२
स्वासने समुपावेश्य स्मृत्वा शिवपदाम्बुजम्
हरिः प्राह वचस्तथ्यं नारदं मदनाशनम् ४३
विष्णुरुवाच
कुत आगम्यते तात किमर्थमिह चागतः
धन्यस्त्वं मुनिशार्दूल तीर्थोऽहं तु तवागमात् ४४
विष्णुवाक्यमिति श्रुत्वा नारदो गर्वितो मुनिः
स्ववृत्तं सर्वमाचष्ट समदं मदमोहितः ४५
श्रुत्वा मुनिवचो विष्णुस्स मदं कारणं ततः
ज्ञातवानखिलं स्मृत्वा शिवपादाम्बुजं हृदि ४६
तुष्टाव गिरिशं भक्त्या शिवात्मा शैवराड् हरिः
सांजलिर्विसुधीर्नम्रमस्तकः परमेश्वरम् ४७

विष्णुरुवाच
देवदेव महादेव प्रसीद परमेश्वर
धन्यस्त्वं शिव धन्या ते माया सर्व विमोहिनी ४८
इत्यादि स स्तुतिं कृत्वा शिवस्य परमात्मनः
निमील्य नयने ध्यात्वा विरराम पदाम्बुजम् ४९
यत्कर्तव्यं शंकरस्य स ज्ञात्वा विश्वपालकः
शिवशासनतः प्राह हृदाथ मुनिसत्तमम् ५०
विष्णुरुवाच
धन्यस्त्वं मुनिशार्दूल तपोनिधिरुदारधीः
भक्तित्रिकं न यस्यास्ति काममोहादयो मुने ५१
विकारास्तस्य सद्यो वै भवंत्यखिलदुःखदाः
नैष्ठिको ब्रह्मचारी त्वं ज्ञानवैराग्यवान्सदा ५२
कथं कामविकारीस्या जन्मनाविकृतस्सुधीः
इत्याद्युक्तं वचो भूरि श्रुत्वा स मुनिसत्तमः ५३
विजहास हृदा नत्वा प्रत्युवाच वचो हरिम्
नारद उवाच
किंप्रभावः स्मरः स्वामिन्कृपा यद्यस्ति ते मयि ५४
इत्युक्त्वा हरिमानम्य ययौ यादृच्छिको मुनिः ५५

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखण्डे
सृष्ट्युपाख्याने नारदतपोवर्णनं नाम द्वितीयोऽध्यायः २

ऋषय ऊचुः
सूतसूत महाभाग व्यासशिष्य नमोऽस्तु ते
अद्भुतेयं कथा तात वर्णिता कृपया हि नः १
मुनौ गते हरिस्तात किं चकार ततः परम्

नारदोऽपि गतः कुत्र तन्मे व्याख्यातुमर्हसि २
व्यास उवाच
इत्याकर्ण्य वचस्तेषां सूतः पौराणिकोत्तमः
प्रत्युवाच शिवं स्मृत्वा नानासूतिकरं बुधः ३
सूत उवाच
मुनौ यदृच्छया विष्णुर्गते तस्मिन्हि नारदे
शिवेच्छया चकाराशु माया मायाविशारदः ४
मुनिमार्गस्य मध्ये तु विरेचे नगरं महत्
शतयोजनविस्तारमद्भुतं सुमनो हरम् ५
स्वलोकादधिकं रम्यं नानावस्तु विराजितम्
नरनारीविहाराढ्यं चतुर्वर्णाकुलं परम् ६
तत्र राजा शीलनिधिर्नामैश्वर्यसमन्वितः
सुतास्वयम्वरोद्युक्तो महोत्सवसमन्वितः ७
चतुर्दिग्भ्यः समायातैस्संयुतं नृपनन्दनैः
नानावेषैस्सुशोभैश्च तत्कन्यावरणोत्सुकैः ८
एतादृशम्पुरं दृष्ट्वा मोहम्प्राप्तोऽथ नारदः
कौतुकी तन्नृपद्वारं जगाम मदनैधितः ९
आगतं मुनिवर्यं तं दृष्ट्वा शीलनिधिर्नृपः
उपवेश्यार्चयांचक्रे रत्नसिंहासने वरे १०
अथ राजा स्वतनयां नामतश्श्रीमतीं वराम्
समानीय नारदस्य पादयोस्समपातयत् ११
तत्कन्यां प्रेक्ष्य स मुनिर्नारदः प्राह विस्मितः
केयं राजन्महाभागा कन्या सुरसुतोपमा १२
तस्य तद्वचनं श्रुत्वा राजा प्राह कृतांजलिः
दुहितेयं मम मुने श्रीमती नाम नामतः १३

प्रदानसमयं प्राप्ता वरमन्वेषती शुभम्
सा स्वयंवरसंप्राप्ता सर्वलक्षणलक्षिता १४
अस्या भाग्यं वद मुने सर्वं जातकमादरात्
कीदृशं तनयेयं मे वरमाप्स्यति तद्वद १५
इत्युक्तो मुनिशार्दूलस्तामिच्छुः कामविह्वलः
समाभाष्य स राजानं नारदो वाक्यमब्रवीत् १६
सुतेयं तव भूपालसर्वलक्षणलक्षिता
महाभाग्यवती धन्यालक्ष्मीरिव गुणालया १७
सर्वेश्वरोऽजितो वीरो गिरिशसदृशो विभुः
अस्याः पतिर्ध्रुवं भावी कामजित्सुरसत्तमः १८
इत्युक्त्वा नृपमामंत्र्य ययौ यादृच्छिको मुनिः
बभूव कामविवशश्शिवमाया विमोहितः १९
चित्ते विचिन्त्यसमुनिराप्नुयांकथमेनकाम्
स्वयंवरे नृपालानामेकं मांवृणुयात्कथम् २०
सौन्दर्यं सर्वनारीणां प्रियं भवति सर्वथा
तद्दृष्ट्वैव प्रसन्ना सा स्ववशानात्र संशयः २१
विधायेत्थं विष्णुरूपं ग्रहीतुं मुनिसत्तमः
विष्णुलोकं जगामाशु नारदः स्मर विह्वलः २२
प्रणिपत्य हृषीकेशं वाक्यमेतदुवाच ह
रहसित्वां प्रवक्ष्यामि स्ववृत्तान्तमशेषतः २३
तथेत्युक्ते तथाभूते शिवेच्छाकार्यकर्तहि
ब्रूहीत्युक्तवति श्रीशे मुनिराह च केशवम् २४
नारद उवाच
त्वदीयो भूपतिः शीलनिधिस्स वृषतत्परः
तस्य कन्या विशालाक्षी श्रीमतीवरवर्णिनी २५

जगन्मोहिन्यभिख्याता त्रैलोक्येप्यति सुन्दरी
परिणेतुमहं विष्णोतामिच्छाम्यद्यमाचिरम् २६
स्वयंवरं चकरासौ भूपतिस्तनयेच्छया
चतुर्दिग्भ्यसमायाता राजपुत्रास्सहस्रशः २७
यदि दास्यसि रूपं मे तदा तां प्राप्नुयां ध्रुवम्
त्वद्रूपं सा विना कंठे जयमालां न धास्यति २८
स्वरूपं देहि मे नाथ सेवकोऽहं प्रियस्तव
वृणुयान्मां यथा सा वै श्रीमती क्षितिपात्मजा २९
सूत उवाच
वचः श्रुत्वा मुनेरित्थं विहस्य मधुसूदनः
शांकरीं प्रभुतां बुद्ध्वा प्रत्युवाच दयापरः ३०
विष्णुरुवाच
स्वेष्टदेशं मुने गच्छ करिष्यामि हितं तव
भिषग्वरो यथार्त्तस्य यतः प्रियतरोऽसिमे ३१
इत्युक्त्वा मुनये तस्मै ददौ विष्णुर्मुखं हरे
स्वरूपमनुगृह्यास्य तिरोधानं जगाम सः ३२
एवमुक्तो मुनिर्हृष्टः स्वरूपं प्राप्य वै हरेः
मेने कृतार्थमात्मानं तद्यत्नं न बुबोध सः ३३
अथ तत्र गतः शीघ्रन्नारदो मुनिसत्तमः
चक्रे स्वयम्वरं यत्र राजपुत्रैस्समाकुलम् ३४
स्वयम्वरसभा दिव्या राजपुत्रसमावृता
शुशुभेऽतीव विप्रेन्द्रा यथा शक्रसभापरा ३५
तस्यां नृपसभायां वै नारदः समुपाविशत्
स्थित्वा तत्र विचिन्त्येति प्रीतियुक्तेन चेतसा ३६
मां वरिष्यति नान्यं सा विष्णुरूपधरन्ध्रुवम्

आननस्य कुरूपत्वं न वेद मुनिसत्तमः ३७
पूर्वरूपं मुनिं सर्वे ददृशुस्तत्र मानवाः
तद्भेदं बुबुधुस्ते न राजपुत्रादयो द्विजाः ३८
तत्र रुद्रगणौ द्वौ तद्रक्षणार्थं समागतौ
विप्ररूपधरौ गूढौ तद्भेदं जज्ञतुः परम् ३९
मूढं मत्वा मुनिं तौ तन्निकटं जग्मतुर्गणौ
कुरुतस्तत्प्रहासं वै भाषमाणौ परस्परम् ४०
पश्य नारद रूपं हि विष्णोरिव महोत्तमम्
मुखं तु वानरस्येव विकटं च भयंकरम् ४१
इच्छत्ययं नृपसुतां वृथैव स्मरमोहितः
इत्युक्त्वा सच्छलं वाक्यमुपहासं प्रचक्रतुः ४२
न शुश्राव यथार्थं तु तद्वाक्यं स्मरविह्वलः
पर्यैक्षच्छ्रीमतीं तां वै तल्लिप्सुर्मोहितो मुनिः ४३
एतस्मिन्नंतरे भूपकन्या चांतः पुरात्तु सा
स्त्रीभिस्समावृता तत्राजगाम वरवर्णिनी ४४
मालां हिरण्मयीं रम्यामादाय शुभलक्षणा
तत्र स्वयम्वरे रेजे स्थिता मध्ये रमेव सा ४५
बभ्राम सा सभां सर्वां मालामादाय सुव्रता
वरमन्वेषती तत्र स्वात्माभीष्टं नृपात्मजा ४६
वानरास्यं विष्णुतनुं मुनिं दृष्ट्वा चुकोप सा
दृष्टिं निवार्य च ततः प्रस्थिता प्रीतमानसा ४७
न दृष्ट्वा स्ववरं तत्र त्रस्तासीन्मनसेप्सितम्
अंतस्सभास्थिता कस्मिन्नर्पयामास न स्रजम् ४८
एतस्मिन्नंतरे विष्णुराजगाम नृपाकृतिः
न दृष्टः कैश्चिदपरैः केवलं सा ददर्श हि ४९

अथ सा तं समालोक्य प्रसन्नवदनाम्बुजा
अर्पयामास तत्कण्ठे तां मालां वरवर्णिनी ५०
तामादाय ततो विष्णू राजरूपधरः प्रभुः
अंतर्धानमगात्सद्यस्स्वस्थानं प्रययौ किल ५१
सर्वे राजकुमाराश्च निराशाः श्रीमतीम्प्रति
मुनिस्तु विह्वलोऽतीव बभूव मदनातुरः ५२
तदा तावूचतुस्सद्यो नारदं स्वरविह्वलम्
विप्ररूपधरौ रुद्रगणौ ज्ञानविशारदौ ५३
गणावूचतुः
हे नारदमुनेत्वं हि वृथामदनमोहितः
तल्लिप्सुस्स्वमुखं पश्य वानरस्येव गर्हितम् ५४
सूत उवाच
इत्याकर्ण्यतयोर्वाक्यं नारदो विस्मितोऽभवत्
मुखं ददर्श मुकुरे शिवमायाविमोहितः ५५
स्वमुखं वानरस्येव दृष्ट्वा चुक्रोधसत्वरम्
शापन्ददौ तयोस्तत्र गणयोर्मोहितो मुनिः ५६
युवां ममोपहासं वै चक्रतुर्ब्राह्मणस्य हि
भवेतां राक्षसौ विप्रवीर्यजौ वै तदाकृती ५७
श्रुत्वा हरगणावित्थं स्वशापं ज्ञानिसत्तमौ
न किंचिदूचतुस्तौ हि मुनिमाज्ञाय मोहितम् ५८
स्वस्थानं जग्मतुर्विप्रा उदासीनौ शिवस्तुतिम्
चक्रतुर्मन्यमानौ वै शिवेच्छां सकलां सदा ५९

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखंडे
सृष्ट्युपाख्याने नारदमोहवर्णनं नाम तृतीयोऽध्यायः ३

ऋषय ऊचुः
सूत सूत महाप्राज्ञ वर्णिता ह्यद्भुता कथा
धन्या तु शांभवी माया तदधीनं चराचरम् १
गतयोर्गणयोश्शंभोस्स्वयमात्मेच्छया विभोः
किं चकार मुनिः क्रुद्धो नारदः स्मरविह्वलः २
सूत उवाच
विमोहितो मुनिर्दत्त्वा तयोश्शापं यथोचितम्
जले मुखं निरीक्ष्याथ स्वरूपं गिरिशेच्छया ३
शिवेच्छया न प्रवुद्धः स्मृत्वा हरिकृतच्छलम्
क्रोधं दुर्विषहं कृत्वा विष्णुलोकं जगाम ह ४
उवाच वचनं क्रुद्धस्समिद्ध इव पावकः
दुरुक्तिगर्भितं व्यङ्गं नष्टज्ञानश्शिवेच्छया ५
नारद उवाच
हे हरे त्वं महादुष्टः कपटी विश्वमोहनः
परोत्साहं न सहसे मायावीमलिनाशयः ६
मोहिनीरूपमादाय कपटं कृतवान्पुरा
असुरेभ्योऽपाययस्त्वं वारुणीममृतं न हि ७
चेत्पिबेन्न विषं रुद्रोदयां कृत्वा महेश्वरः
भवेन्नष्टाऽखिला माया तव व्याजरते हरे ८
गतिस्सकपटा तेऽतिप्रिया विष्णोविशेषतः
साधुस्वभावो नभवान्स्वतंत्रः प्रभुणा कृतः ९
कृतं समुचितन्नैव शिवेन परमात्मना
तत्प्रभावबलं ध्यात्वा स्वतंत्रकृतिकारकः १०
त्वद्गतिं सुसमाज्ञाय पश्चात्तापमवाप सः
विप्रं सर्वोपरिप्राह स्वोक्तवेदप्रमाणकृत् ११

तज्ज्ञात्वाहं हरे त्वाद्य शिक्षयिष्यामि तद्बलात्
यथा न कुर्याः कुत्रापीदृशं कर्म कदाचन १२
अद्यापि निर्भयस्त्वं हि संगं नापस्तरस्विना
इदानीं लप्स्यसे विष्णो फलं स्वकृतकर्मणः १३
इत्थमुक्त्वा हरिं सोथ मुनिर्मायाविमोहितः
शशापक्रोधनिर्विण्णो ब्रह्मतेजः प्रदर्शयन् १४
स्त्रीकृते व्याकुलं विष्णो मामकार्षीर्विमोहकः
अन्वकार्षीस्स्वरूपेण येन कापट्यकार्यकृत् १५
तद्रूपेण मनुष्यस्त्वं भव तद्दुःखभुग्घरे
यन्मुखं कृतवान्मेत्वं ते भवंतु सहायिनः १६
त्वं स्त्रीवियोगजं दुःखं लभस्व परदुःखदः
मनुष्यगतिकः प्रायो भवाज्ञानविमोहितः १७
इति शप्त्वा हरिं मोहान्नारदोऽज्ञानमोहितः
विष्णुर्जग्राह तं शापं प्रशंसञ्शांभवीमजाम् १८
अथ शंभुर्महालीलो निश्चकर्ष विमोहिनीं
स्वमायां मोहितो ज्ञानी नारदोप्यभवद्यया १९
अंतर्हितायां मायायां पूर्ववन्मतिमानभूत्
नारदो विस्मितमनाः प्राप्तबोधो निराकुलः २०
पश्चात्तापमवाप्याति निनिन्द स्वं मुहुर्मुहुः
प्रशशंस तदा मायां शांभवीं ज्ञानिमोहिनीम् २१
अथ ज्ञात्वा मुनिस्सर्वं मायाविभ्रममात्मनः
अपतत्पादयोर्विष्णोर्नारदो वैष्णवोत्तमः २२
हर्य्युपस्थापितः प्राह वचनं नष्टदुर्मतिः
मया दुरुक्तयः प्रोक्ता मोहितेन कुबुद्धिना २३
दत्तश्शापोऽपि तेनाथ वितथं कुरु तं प्रभो

महत्पापमकार्षं हि यास्यामि निरयं ध्रुवम् २४
कमुपायं हरे कुर्यां दासोऽहं ते तमादिश
येन पापकुलं नश्येन्निरयो न भवेन्मम २५
इत्युक्त्वा स पुनर्विष्णोः पादयोर्मुनिसत्तमः
पपात सुमतिर्भक्त्या पश्चात्तापमुपागतः २६
अथ विष्णुस्तमुत्थाप्य बभाषे सूनृतं वचः
विष्णुरुवाच
न खेदं कुरु मे भक्त वरस्त्वं नात्र संशयः २७
शृणु तात प्रवक्ष्यामि सुहितं तव निश्चयात्
निरयस्ते न भविता शिवश्शं ते विधास्यति २८
यदकार्षीश्शिववचो वितथं मदमोहितः
स दत्तवानीदृशं ते फलं कर्म फलप्रदः २९
शिवेच्छाऽखिलं जातं कुर्वित्थं निश्चितां मतिम्
गर्वापहर्ता स स्वामी शंकरः परमेश्वरः ३०
परं ब्रह्म परात्मा स सच्चिदानंदबोधनः
निर्गुणो निर्विकारो च रजस्सत्वतमः पर ३१
स एवमादाय मायां स्वां त्रिधा भवति रूपतः
ब्रह्मविष्णुमहेशात्मानिर्गुणोऽनिर्गुणोऽपि सः ३२
निर्गुणत्वे शिवाह्वो हि परमात्मा महेश्वरः
परं ब्रह्माव्ययोऽनंतो महादेवेति गीयते ३३
तत्सेवया विधिस्स्त्रष्टा पालको जगतामहम्
स्वयं सर्वस्य संहारी रुद्ररूपेण सर्वदा ३४
साक्षी शिवस्वरूपेण मायाभिन्नस्स निर्गुणः
स्वेच्छाचारी संविहारी भक्तानुग्रहकारकः ३५
शृणु त्वं नारद मुने सदुपायं सुखप्रदम्

सर्वपापापहर्त्तारं भुक्तिमुक्तिप्रदं सदा ३६
त्युक्त्वा स्त्वसंशयं सर्वं शंकरसद्यशः
शतनामशिवस्तोत्रं सदानन्यमतिर्जप ३७
यज्ञपित्वा द्रुतं सर्वं तव पापं विनश्यति
इत्युक्त्वा नारदं विष्णुः पुनः प्राह दयान्वितः ३८
मुने न कुरु शोकं त्वं त्वया किंचित्कृतं नहि
स्वेच्छया कृतवान्शंभुरिदं सर्वं न संशयः ३९
अहार्षित्त्वन्मतिं दिव्यां काम क्लेशमदात्स ते
त्वन्मुखाद्दापयांचक्रे शापं मे स महेश्वरः ४०
इत्थं स्वचरितं लोके प्रकटीकृतवान् स्वयम्
मृत्युंजयः कालकालो भक्तोद्धारपरायणः ४१
न मे शिवसमानोस्ति प्रियः स्वामी सुखप्रदः
सर्वशक्तिप्रदो मेऽस्ति स एव परमेश्वरः ४२
तस्योपास्यां कुरु मुने तमेव सततं भज
तद्यशः शृणु गाय त्वं कुरु नित्यं तदर्चनम् ४३
कायेन मनसा वाचा यश्शंकरमुपैति भो
स पण्डित इति ज्ञेयस्स जीवन्मुक्त उच्यते ४४
शिवेति नामदावाग्नेर्महापातकपर्वताः
भस्मीभवन्त्यनायासात्सत्यं सत्यं न संशयः ४५
पापमूलानि दुःखानि विविधान्यपि तान्यतः
शिवार्चनैकनश्यानि नान्य नश्यानि सर्वथा ४६
स वैदिकस्स पुण्यात्मा स धन्यस्स बुधो मुने
यस्सदा कायवाक्चित्तैश्शरणं याति शंकरम् ४७
भवंति विविधा धर्मा येषां सद्यः फलोन्मुखाः
तेषां भवति विश्वासस्त्रिपुरांतकपूजने ४८

पातकानि विनश्यंति यावंति शिवपूजया
भुवि तावंति पापानि न संत्येव महामुने ४९
ब्रह्महत्यादिपापानां राशयोप्यमिता मुने
शिवस्मृत्या विनश्यंति सत्यं सत्यं वदाम्यहम् ५०
शिवनामतरीं प्राप्य संसाराब्धिं तरंति ते
संसारमूलपापानि तस्य नश्यंत्यसंशयम् ५१
संसारमूलभूतनां पातकानां महामुने
शिवनामकुठारेण विनाशो जायते ध्रुवम् ५२
शिवनामामृतं पेयं पापदावानलार्दितैः
पापदावाग्नितप्तानां शांतिस्तेन विना न हि ५३
शिवेति नामपीयूषवर्षधारापरिप्लुतः
संसारदवमध्यपि न शोचति न संशयः ५४
न भक्तिश्शंकरे पुंसां रागद्वेषरतात्मनाम्
तद्विधानां हि सहसा मुक्तिर्भवति सर्वथा ५५
अनंतजन्मभिर्येन तपस्तप्तं भविष्यति
तस्यैवभक्तिर्भवति भवानी प्राणवल्लभे ५६
जातापि शंकरे भक्तिरन्यसाधारणी वृथा
परंत्वव्यभिचारेणशिवभक्तिरपेक्षिता ५७
यस्यासाधारणीशंभौ भक्तिरव्यभिचारिणी
तस्यैवमोक्षस्सुलभोनास्येतिन्य मतिर्मम ५८
कृत्वाप्यनंतपापानियदि भक्तिर्महेश्वरे
सर्वपापविनिर्मुक्तो भवत्येव न संशयः ५९
भवंति भस्मसाद्वृक्षादवदग्धा यथावने
तथा भवन्ति दग्धानि शांकराणामघान्यपि ६०
योनित्यं भस्मपूतांगो शिवपूजोन्मुखो भवेत्

स तरत्येव संसारमपारमतिदारुणम् ६१
ब्रह्मस्वहरणं कृत्वा हत्वापि ब्राह्मणान्बहून्
लिप्यते नरः पापैर्विरूपाक्षस्य सेवकः ६२
विलोक्य वेदानखिलाञ्छिवस्यैवार्चनम्परम्
संसारनाशनोपाय इति पूर्वैर्विनिश्चितम् ६३
अद्यप्रभृति यत्नेन सावधानो यथाविधि
साम्बं सदाशिवं भक्त्या भज नित्यं महेश्वरम् ६४
आपादमस्तकं सम्यक् भस्मनोद्धूल्य सादरम्
सर्वश्रुतिश्रुतं शैवम्मंत्रञ्जप षडक्षरम् ६५
सर्वाङ्गेषु प्रयत्नेन रुद्राक्षाञ्छिववल्लभान्
धारयस्वातिसद्भक्त्या समन्त्रम्विधिपूर्वकम् ६६
शृणु शैवीं कथां नित्यं वद शैवीं कथां सदा
पूजयस्वातियत्नेन शिवभक्तान्पुनः पुनः ६७
अप्रमादेन सततं शिवैकशरणो भव
शिवार्चनेन सततमानन्दः प्राप्यते यतः ६८
उरस्याधाय विशदे शिवस्य चरणाम्बुजौ
शिवतीर्थानि विचर प्रथमं मुनिसत्तम ६९
पश्यन्माहात्म्यमतुलं शंकरस्य परात्मनः
गच्छानन्दवनं पश्चाच्छंभुप्रियतमं मुने ७०
तत्र विश्वेश्वरं दृष्ट्वा पूजनं कुरु भक्तितः
नत्वा स्तुत्वा विशेषेण निर्विकल्पो भविष्यसि ७१
ततश्च भवता नूनं विधेयं गमनं मुने
ब्रह्मलोके स्वकामार्थं शासनान्मम भक्तितः ७२
नत्वा स्तुत्वा विशेषेण विधिं स्वजनकं मुने
प्रष्टव्यं शिवमाहात्म्यं बहुशः प्रीतचेतसा ७३

स शैवप्रवरो ब्रह्मा माहात्म्यं शंकरस्य ते
श्रावयिष्यति सुप्रीत्या शतनामस्तवं च हि ७४
अद्यतस्त्वं भव मुने शैवश्शिवपरायणः
मुक्तिं भागी विशेषेण शिवस्ते शंविधास्यति ७५
इत्थं विष्णुर्मुनिं प्रीत्या ह्युपदिश्य प्रसन्नधीः
स्मृत्वा नुत्वा शिवं स्तुत्वा ततस्त्वंतरधीयत ७६
इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखंडे
सृष्ट्युपाख्याने नारदस्य विष्णूपदेशवर्णनो नाम चतुर्थोऽध्यायः ४

सूत उवाच
अंतर्हिते हरौ विप्रा नारदो मुनिसत्तमः
विचचार महीं पश्यञ्छिवलिंगानि भक्तितः १
पृथिव्या अटनं कृत्वा शिवरूपाण्यनेकशः
ददर्श प्रीतितो विप्रा भुक्तिमुक्तिप्रदानि सः २
अथ तं विचरंतं कौ नारदं दिव्यदर्शनम्
ज्ञात्वा शंभुगणौ तौ तु सुचित्तमुपजग्मतुः ३
शिरसा सुप्रणम्याशु गणावूचतुरादरात्
गृहीत्वा चरणौ तस्य शापोद्धारेच्छया चतौ ४
शिवगणावूचतुः
ब्रह्मपुत्र सुरर्षे हि शृणु प्रीत्यावयोर्वचः
तवापराधकर्तारावावां विप्रौ न वस्तुतः ५
आवां हरगणौ विप्र तवागस्कारिणौ मुने
स्वयम्वरे राजपुत्र्या मायामोहितचेतसा ६
त्वया दत्तश्च नौ शापः परेशप्रेरितेन ह
ज्ञात्वा कुसमयं तत्र मौनमेव हि जीवनम् ७

स्वकर्मणः फलं प्राप्तं कस्यापि न हि दूषणम्
सुप्रसन्नो भव विभो कुर्वनुग्रहमद्यनौ ८
सूत उवाच
वच आकर्ण्य गणयोरिति भक्त्युक्तमादरात्
प्रत्युवाच मुनिः प्रीत्या पश्चात्तापमवाप्य सः ९
नारद उवाच
शृणुतं मे महादेव गणौ मान्यतमौ सताम्
वचनं सुखदं मोहनिर्मुक्तं च यथार्थकम् १०
पुरा मम मतिर्भ्रष्टा सीच्छिवेच्छावशात् ध्रुवम्
सर्वथा मोहमापन्नश्शप्तवान्वां कुशेमुषिः ११
यदुक्तं तत्तथा भावि तथापि शृणुतां गणौ
शापोद्धारमहं वच्मि क्षमेथा मघमद्य मे १२
वीर्यान्मुनिवरस्याप्त्वा राक्षसेशत्वमादिशम्
स्यातां विभवसंयुक्तौ बलिनो सुप्रतापिनौ १३
सर्वब्रह्मांडराजानौ शिवभक्तौ जितेन्द्रियौ
शिवापरतनोर्मृत्यु प्राप्य स्वं पदमाप्स्यथः १४
सूत उवाच
इत्याकर्ण्य मुनेर्वाक्यं नारदस्य महात्मनः
उभौ हरगणौ प्रीतौ स्वं पदं जग्मतुर्मुदा १५
नारदोऽपि परं प्रीतो ध्यायच्छिवमनन्यधीः
विचचार महीं पश्यञ्छिवतीर्थान्यभीक्ष्णशः १६
काशीं प्राप्याथ स मुनिः सर्वोपरि विराजिताम्
शिवप्रियां शंभुसुखप्रदां शम्भुस्वरूपिणीम् १७
दृष्ट्वा काशीं कृताऽर्थोभूत्काशीनाथं ददर्श ह
आनर्च परम प्रीत्या परमानन्दसंयुतः १८

स मुदः सेव्यतां काशीं कृतार्थो मुनिसत्तमः
नमन्संवर्णयन्भक्त्या संस्मरन्प्रेमविह्वलः १९
ब्रह्मलोकं जगामाथ शिवस्मरणसन्मतिः
शिवतत्त्वं विशेषेण ज्ञातुमिच्छुस्स नारदः २०
नत्वा तत्र विधिं भक्त्या स्तुत्वा च विविधैस्तवैः
पप्रच्छ शिवत्तत्वं शिवसंभक्तमानसः २१
नारद उवाच
ब्रह्मन्ब्रह्मस्वरूपज्ञ पितामह जगत्प्रभो
त्वत्प्रसादान्मया सर्वं विष्णोर्माहात्म्यमुत्तमम् २२
भक्तिमार्गं ज्ञानमार्गं तपोमार्गं सुदुस्तरम्
दानमार्गञ्च तीर्थानां मार्गं च श्रुतवाहनम् २३
न ज्ञातं शिवतत्त्वं च पूजाविधिमतः क्रमात्
चरित्रं विविधं तस्य निवेदय मम प्रभो २४
निर्गुणोऽपि शिवस्तात सगुणश्शंकरः कथम्
शिवतत्त्वं न जानामि मोहितश्शिवमायया २५
सृष्टेः पूर्वं कथं शंभुस्स्वरूपेण प्रतिष्ठितः
सृष्टिमध्ये स हि कथं क्रीडन्संवर्तते प्रभुः २६
तदन्ते च कथं देवस्स तिष्ठति महेश्वरः
कथं प्रसन्नतां याति शंकरो लोकशंकरः २७
संतुष्टश्च स्वभक्तेभ्यः परेभ्यश्च महेश्वरः
किं फलं यच्छति विधे तत्सर्वं कथयस्व मे २८
सद्यः प्रसन्नो भगवान्भवतीत्यनुसंश्रुतम्
भक्तप्रयासं स महान्न पश्यति दयापरः २९
ब्रह्मा विष्णुर्महेशश्च त्रयो देवाश्शिवांशजाः
महेशस्तत्र पूर्णांशस्स्वयमेव शिवः परः ३०

तस्याविर्भावमाख्याहि चरितानि विशेषतः
उमाविर्भावमाख्याहि तद्विवाहं तथा विभो ३१
तद्गार्हस्थ्यं विशेषेण तथा लीलाः परा अपि
एतत्सर्वं तथान्यच्च कथनीयंत्वयानघ ३२
तदुत्पत्तिं विवाहं च शिवायास्तुविशेषतः
प्रब्रूहि प्रे प्रजानाथ गुहजन्मतथैव च ३३
बहुभ्यश्च श्रुतं पूर्वं न तृप्तोऽस्मिजगत्प्रभो
अतस्त्वांशरणं प्राप्तः कृपां कुरु ममो परि ३४
इति श्रुत्वा वचस्तस्य नारदस्यांगजस्य हि
उवाच वचनं तत्र ब्रह्मालोकपितामहः ३५

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखंडे
सृष्ट्युपाख्याने नारदप्रश्नवर्णनो नाम पञ्चमोऽध्यायः ५

ब्रह्मोवाच
भो ब्रह्मन्साधु पृष्टोऽहंत्वया विबुधसत्तम
लोकोपकारिणा नित्यं लोकानां हितकाम्यया १
यच्छ्रुत्वा सर्वलोकानां सर्वपापक्षयो भवेत्
तदहं ते प्रवक्ष्यामि शिवतत्त्वमनामयम् २
शिवतत्त्वं मया नैव विष्णुनापि यथार्थतः
ज्ञातञ्च परमं रूपमद्भुतं च परेण न ३
महाप्रलयकाले च नष्टे स्थावरजंगमे
आसीत्तमोमयं सर्वमनर्कग्रहतारकम् ४
अचन्द्रमनहोरात्रमनग्न्यनिलभूजलम्
अप्रधानं वियच्छून्यमन्यतेजो विवर्जितम् ५
अदृष्टत्वादिरहितं शब्दस्पर्शसमुज्झितम्

अव्यक्तगंधरूपं च रसत्यक्तमदिङ्मुखम् ६
इत्थं सत्यं धतमसे सूचीभेद्ये निरंतरे
तत्सद्ब्रह्मेति यच्छ्रुत्वा सदेकं प्रतिपद्यते ७
इतीदृशं यदा नासीद्यत्तत्सदसदात्मकम्
योगिनोंतर्हिताकाशे यत्पश्यंति निरंतरम् ८
अमनोगोचरम्वाचां विषयन्न कदाचन
अनामरूपवर्णं च न च स्थूलं न यत्कृशम् ९
अह्रस्वदीर्घमलघुगुरुत्वपरिवर्जितम्
न यत्रोपचयः कश्चित्तथा नापचयोऽपि च १०
अभिधत्ते स चकितं यदस्तीति श्रुतिः पुनः
सत्यं ज्ञानमनंतं च परानंदम्परम्महः ११
अप्रमेयमनाधारमविकारमनाकृति
निर्गुणं योगिगम्यञ्च सर्वव्याप्येककारकम् १२
निर्विकल्पं निरारंभं निर्मायं निरुपद्रवम्
अद्वितीयमनाद्यन्तमविकाशं चिदात्मकम् १३
यस्येत्थं संविकल्पंते संज्ञासंज्ञोक्तितः स्म वै
कियता चैव कालेन द्वितीयेच्छाऽभवत्किल १४
अमूर्तेन स्वमूर्तिश्च तेनाकल्पि स्वलीलया
सर्वैश्वर्यगुणोपेता सर्वज्ञानमयी शुभा १५
सर्वगा सर्वरूपा च सर्वदृक्सर्वकारिणी
सर्वैकवंद्या सर्वाद्या सर्वदा सर्वसंस्कृतिः १६
परिकल्प्येति तां मूर्तिमैश्वरीं शुद्धरूपिणीम्
अद्वितीयमनाद्यंतं सर्वाभासं चिदात्मकम्
अंतर्दधे पराख्यं यद्ब्रह्म सर्वगमव्ययम् १७
अमूर्तं यत्पराख्यं वै तस्य मूर्तिस्सदाशिवः

अर्वाचीनाः पराचीना ईश्वरं तं जगुर्बुधाः १८
शक्तिस्तदैकलेनापि स्वैरं विहरता तनुः
स्वविग्रहात्स्वयं सृष्टा स्वशरीरानपायिनी १९
प्रधानं प्रकृति तां च मायां गुणवतीं पराम्
बुद्धितत्त्वस्य जननीमाहुर्विकृतिवर्जिताम् २०
सा शक्तिरम्बिका प्रोक्ता प्रकृतिस्सकलेश्वरी
त्रिदेवजननी नित्या मूलकारणमित्युत २१
अस्या अष्टौ भुजाश्चासन्विचित्रवदना शुभा
राकाचन्द्रसहस्रस्य वदने भाश्च नित्यशः २२
नानाभरणसंयुक्ता नानागतिसमन्विता
नानायुधधरा देवी फुल्लपंकजलोचना २३
अचिंत्यतेजसा युक्ता सर्वयोनिस्समुद्यता
एकाकिनी यदा माया संयोगाच्चाप्यनेकिका २४
परः पुमानीश्वरस्स शिवश्शंभुरनीश्वरः
शीर्षे मन्दाकिनीधारी भालचन्द्रस्त्रिलोचनः २५
पंचवक्त्रः प्रसन्नात्मा दशबाहुस्त्रिशूलधृक्
कर्पूरगौरसुसितो भस्मोद्धूलितविग्रहः २६
युगपच्च तया शक्त्या साकं कालस्वरूपिणा
शिवलोकाभिधं क्षेत्रं निर्मितं तेन ब्रह्मणा २७
तदेव काशिकेत्येतत्प्रोच्यते क्षेत्रमुत्तमम्
परं निर्वाणसंख्यानं सर्वोपरि विराजितम् २८
ताभ्यां च रमाणाभ्यां च तस्मिन्क्षेत्रे मनोरमे
परमानं दरूपाभ्यां परमानन्दरूपिणी २९
मुने प्रलयकालेपि न तत्क्षेत्रं कदाचन
विमुक्तं हि शिवाभ्यां यदविमुक्तं ततो विदुः ३०

अस्यानन्दवनं नाम पुराकारि पिनाकिना
क्षेत्रस्यानंदहेतुत्वादविमुक्तमनंतरम् ३१
अथानन्दवने तस्मिञ्छिवयो रममाणयोः
इच्छेत्यभूत्सुरर्षे हि सृज्यः कोप्यपरः किल ३२
यस्मिन्यस्य महाभारमावां स्वस्वैरचारिणौ
निर्वाणधारणं कुर्वः केवलं काशिशायिनौ ३३
सएव सर्वं कुरुतां स एव परिपातु च
स एव संवृणोत्वं ते मदनुग्रहतस्सदा ३४
चेतस्समुद्रमाकुंच्य चिंताकल्लोललोलितम्
सत्त्वरत्नं तमोग्राहं रजोविद्रुमवल्लितम् ३५
यस्य प्रसादात्तिष्ठावस्सुखमानंदकानने
परिक्षिप्तमनोवृत्तौ बहिश्चिंतातुरे सुखम् ३६
संप्रधार्य्येति स विभुस्तया शक्त्या परेश्वरः
सव्ये व्यापारयांचक्रे दशमेंऽगेसुधासवम् ३७
ततः पुमानाविरासीदेकस्त्रैलोक्यसुंदरः
शांतस्सत्त्वगुणोद्रिक्तोगांभीर्य्यामितसागरः ३८
तथा च क्षमया युक्तोमुनेऽलब्धोपमोऽभवत्
इन्द्रनीलद्युतिः श्रीमान्पुण्डरीकोत्तमेक्षणः ३९
सुवर्णकृतिभृच्छ्रेष्ठदुकूलयुगलावृतः
लसत्प्रचंडदोर्दण्डयुगलोह्यपरा जितः ४०
ततस्सपुरुष श्शंभुं प्रणम्य परमेश्वरम्
नामानि कुरु मे स्वामिन्वद कर्म जगाविति ४१
तच्छ्रुत्वा वचनम्प्राह शंकरः प्रहसन्प्रभुः
पुरुषं तं महेशात्तो वाचा मेघगभीरया ४२
शिव उवाच

विष्णिवतिव्यापकत्वात्ते नाम ख्यातं भविष्यति
बहून्यन्यानि नामानि भक्तसौख्यकराणि ह ४३
तपः कुरु दृढो भूत्वा परमं कार्यसाधनम्
इत्युक्त्वा श्वासमार्गेण ददौ च निगमं ततः ४४
ततोऽच्युतश्शिवं नत्वा चकार विपुलं तपः
अंतर्द्धानं गतश्शक्त्या सलोकः परमेश्वरः ४५
दिव्यं द्वादश साहस्त्रं वर्षं तप्त्वापि चाच्युतः
न प्राप स्वाभिलषितं सर्वदं शंभुदर्शनम् ४६
तत्तत्संशयमापन्नश्चिंतितं हृदि सादरम्
मयाद्य किं प्रकर्त्तव्यमिति विष्णुश्शिवं स्मरन् ४७
एतस्मिन्नंतरे वाणी समुत्पन्ना शिवाच्छुभा
तपः पुनः प्रकर्त्तव्यं संशयस्यापनुत्तये ४८
ततस्तेन च तच्छ्रुत्वा तपस्तप्त सुदारुणम्
बहुकालं तदा ब्रह्मध्यानमार्गपरेण हि ४९
ततस्स पुरुषो विष्णुः प्रबुद्धोः ध्यानमार्गतः
सुप्रीतो विस्मयं प्राप्तः किं यत्तव महा इति ५०
परिश्रमवतस्तस्य विष्णोः स्वाङ्गेभ्य एव च
जलधारा हि संयाता विविधाश्शिवमायया ५१
अभिव्याप्तं च सकलं शून्यं यत्तन्महामुने
ब्रह्मरूपं जलमभूत्स्पर्शनात्पापनाशनम् ५२
तदा श्रांतश्च पुरुषो विष्णुस्तस्मिञ्जले स्वयम्
सुष्वाप परम प्रीतो बहुकालं विमोहितः ५३
नारायणेति नामापि तस्यसीच्छ्रुतिसंमतम्
नान्यत्किंचित्तदा ह्यासीत्प्राकृतं पुरुषं विना ५४
एतस्मिन्नन्तरे काले तत्त्वान्यासन्महात्मनः

तत्प्रकारं शृणु प्राज्ञ गदतो मे महामते ५५
प्रकृतेश्च महानासीन्महतश्च गुणास्त्रयः
अहंकारस्ततो जातस्त्रिविधो गुणभेदतः ५६
तन्मात्राश्च ततो जातः पञ्चभूतानि वै तताः
तदैव तानीन्द्रियाणि ज्ञानकर्ममयानि च ५७
तत्त्वानामिति संख्यानमुक्तं ते ऋषिसत्तम
जडात्मकञ्च तत्सर्वं प्रकृतेः पुरुषं विना ५८
तत्तदैकीकृतं तत्त्वं चतुर्विंशतिसंख्यकम्
शिवेच्छया गृहीत्वा स सुष्वाप ब्रह्मरूपके ५९
इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां सृष्टिव्याख्याने
प्रथमखंडे विष्णूत्पत्तिवर्णनो नाम षष्ठोऽध्यायः ६

ब्राह्मोवाच
सुप्ते नारायणे देवे नाभौ पंकजमुत्तमम्
आविर्बभूव सहसा वृहवै सकरेच्छया १
अनंतयष्टिकायुक्तं कर्णिकारसमप्रभम्
अनंतयोजनायाममनंतोच्छ्रायसंयुतम् २
कोटिसूर्यप्रतीकाशं सुंदर वचसयुतम्
अत्यद्भुतं महारम्यं दर्शनीयमनुत्तमम् ३
कृत्वा यत्नं पूर्ववत्स शंकरः परमेश्वरः
दक्षिणांगान्निजान्मां कैसाशीश्शंभुरजीजनत् ४
स मायामोहितं कृत्वा मां महेशो द्रुतं मुने
तन्नाभिपंकजादाविर्भा वयामास लीलया ५
एपमाद्यात्ततो जज्ञे पुत्रोऽहं हेमगर्भकः
चतुर्मुखो रक्तवर्णस्त्रिपुंड्रांकितमस्तकः ६

तन्मायामोहितश्चाहं नाविदं कमलं विना
स्वदेहजनकं तात पितरं ज्ञानदुर्बलः ७
कोहं वा कुत आयातः किं कार्यं तु मदीयकम्
कस्य पुत्रोऽहमुत्पन्नः केनैव निर्मितोऽधुना ८
इति संशयमापन्नं बुद्धिर्मों समपद्यत
किमर्थं मोहमायामि तज्ज्ञानं सुकरं खलु ९
एतत्कमलपुष्पस्य पत्रारोहस्थलं ह्यधः
मत्कर्ता च स वै तत्र भविष्यति न संशयः १०
इति बुद्धिं समास्थाय कमलादवरो हयन्
नाले नाले गतस्तत्र वर्षाणां शतकं मुने ११
न लब्धं तु मया तत्र कमलस्थानमुत्तमम्
संशयं च पुनः प्राप्तः कमले गन्तुमुत्सुकः १२
आरुरोहाथ कमलं नालमार्गेण वै मुने
कुड्मलं कमलस्याथ लब्धवान्न विमोहिताः १३
नालमार्गेण भ्रमतो गतं वर्षशतं पुनः
क्षणमात्र तदा तत्र ततस्तिष्ठन्विमोहितः १४
तदा वाणी समुत्पन्ना तपेति परमा शुभा
शिवेच्छया परा व्योम्नो मोहविध्वंसिनी मुने १५
तच्छ्रुत्वा व्योमवचनं द्वादशाब्दं प्रयत्नतः
पुनस्तप्तं तपो घोरं द्रष्टुं स्वजनकं तदा १६
तदा हि भगवान्विष्णुश्चतुर्बाहुस्सुलोचनः
मय्येवानुग्रहं कर्तुं द्रुतमाविर्बभूव ह १७
शंखचक्रायुधकरो गदापद्मधरः परः
घनश्यामलसर्वांगः पीताम्बरधरः परः १८
मुकुटादिमहाभूषः प्रसन्नमुखपंकजः

कोटिकंदर्पसंकाशस्सन्दृष्टो मोहितेन सः १९
तद्दृष्ट्वा सुन्दरं रूपं विस्मयं परमं गतः
कालाभं कांचनाभं च सर्वात्मानं चतुर्भुजम् २०
तथाभूतमहं दृष्ट्वा सदसन्मयमात्मना
नारायणं महाबाहु हर्षितो ह्यभवं तदा २१
मायया मोहितश्शम्भोस्तदा लीलात्मनः प्रभोः
अविज्ञाय स्वजनकं तमवोचं प्रहर्षितः २२
ब्रह्मोवाच
कस्त्वं वदेति हस्तेन समुत्थाप्य सनातनम्
तदा हस्तप्रहारेण तीव्रेण सुदृढेन तु २३
प्रबुद्धयोत्थाय शयनात्समासीनः क्षणं वशी
ददर्श निद्राविक्लिन्ननीरजामललोचनः २४
मामत्र सस्थितं भासाध्यासितो भगवान्हरिः
आह चोत्थाय ब्रह्माणं हसन्मां मधुरं सकृत् २५
विष्णुरुवाच
स्वागतं स्वागतं वत्स पितामह महाद्युते
निर्भयो भव दास्येऽहं सर्वान्कामान्न संशयः २६
तस्य तद्वचनं श्रुत्वा स्मितपूर्वं सुरर्षभः
रजसा बद्धवैरश्च तमवोचं जनार्दनम् २७
ब्रह्मोवाच
भाषसे वत्स वत्सेति सर्वसंहारकारणम्
मामिहाति स्मितं कृत्वा गुरुश्शिष्यमिवानघ २८
कर्तारं जगतां साक्षात्प्रकृतेश्च प्रवर्तकम्
सनातनमजं विष्णुं विरिंचिं विष्णुसंभवम् २९
विश्वात्मानं विधातारं धातारम्पंकजेक्षणम्

किमर्थं भाषसे मोहाद्वक्तुमर्हसि सत्वरम् ३०
वेदोमां वक्ति नियमात्स्वयंभुवमजं विभुम्
पितामहं स्वराजं च परमेष्ठिनमुत्तमम् ३१
इत्याकरार्य हरिर्वाक्यं मम क्रुद्धोरमापतिः
सोऽपि मामाह जाने त्वां कर्तारमिति लोकतः ३२
विष्णुरुवाच
कर्तुं धर्तुं भवानंगादवतीर्णो ममाव्ययात्
विस्मृतोऽसि जगन्नाथं नारायणमनामयम् ३३
पुरुषं परमात्मानं पुरुहूतं पुरुष्टुतम्
विष्णुमच्युतमीशानं विश्वस्य प्रभवोद्भवम् ३४
नारायणं महाबाहुं सर्वव्यापकमीश्वरम्
मन्नाभिपद्मतस्त्वं हि प्रसूतो नात्र संशयः ३५
तवापराधो नास्त्यत्र त्वयिमायाकृतं मम
शृणु सत्यं चतुर्वक्त्रसर्वदेवेश्वरो ह्यहम् ३६
कर्ता हर्ता च भर्ता च न मयास्ति समो विभुः
अहमेव परं ब्रह्मपरं तत्त्वं पितामह ३७
अहमेव परं ज्योतिः परमात्मा त्वहं विभुः
अद्य दृष्टं श्रुतं सर्वं जगत्यस्मिँश्चराचरम् ३८
तत्तद्विद्धिचतुर्वक्त्र सर्वं मन्मयमित्यथ
मया सृष्टं पुराव्यक्तं चतुर्विंशतितत्त्वकम् ३९
नित्यं तेष्वणवो बद्धास्सृष्टक्रोधभयादयः
प्रभावाच्चभवानंगान्यनेकानीह लीलया ४०
सृष्टा बुद्धिर्मया तस्यामहंकारस्त्रिधा ततः
तन्मात्रं पंकजं तस्मान्मनोदेहेन्द्रियाणि च ४१
आकाशादीनि भूतानि भौतिकानि च लीलया

इति बुद्ध्वा प्रजानाथ शरणं व्रज मे विधे ४२
अहं त्वां सर्वदुःखेभ्यो रक्षिष्यामि न संशयः
ब्रह्मोवाच
इति श्रुत्वा वचस्तस्य ब्रह्मा क्रोधसमन्वितः
को वा त्वमिति संभर्त्स्याब्रुवं मायाविमोहितः ४३
किमर्थं भाषसे भूरि बह्वनर्थकरं वचः
नेश्वरस्त्वं परब्रह्म कश्चित्कर्ता भवेत्तव ४४
मायया मोहितश्चाहं युद्धं चक्रे सुदारुणम्
हरिणा तेन वै सार्द्धं शंकरस्य महाप्रभोः ४५
एवं मम हरेश्चासीत्संगरो रोमहर्षणः
प्रलयार्णवमध्ये तु रजसा बद्धवैरयोः ४६
एतस्मिन्नंतरे लिंगमभवच्चावयोः पुरः
विवादशमनार्थं हि प्रबोधार्थं तथाऽऽवयोः ४७
ज्वालामालासहस्राढ्यं कालान लशतोपमम्
क्षयवृद्धिविनिर्मुक्तमादिमध्यांतवर्जितम् ४८
अनौपम्यमनिर्देश्यमव्यक्तं विश्वसंभवम्
तस्य ज्वालासहस्रेणमोहितो भगवान्हरिः ४९
मोहितं चाह मामत्र किमर्थं स्पर्द्धसेऽधुना
आगतस्तु तृतीयोऽत्र तिष्ठतां युद्धमावयोः ५०
कुत एवात्र संभूतः परीक्षावोऽग्निसंभवम्
अधो गमिष्याम्यनलस्तंभस्यानुपमस्य च ५१
परीक्षार्थं प्रजानाथ तस्य वै वायुवेगतः
भवानूर्द्ध्वं प्रयत्नेन गंतुमर्हतिसत्वरम् ५२
ब्रह्मोवाच
एवं व्याहृत्य विश्वात्मा स्वरूपमकरोत्तदा

वाराहमहमप्याशु हंसत्वं प्राप्तवान्मुने ५३
तदा प्रभृति मामाहुर्हंसहंसो विराडिति
हंसहंसेति यो ब्रूयात्स हंसोऽथ भविष्यति ५४
सुश्वे ह्यनलप्रख्यो विश्वतः पक्षसंयुतः
मनो निलजवो भूत्वा गत्वोद्ध्र्व चोद्ध्र्वतः पुरा ५५
नारायणोऽपि विश्वात्मा सुश्वेतो ह्यभवत्तदा
दशयोजनविस्तीर्णं शतयोजनमायतम् ५६
मेरुपर्तववर्ष्माणं गौरतीक्ष्णोग्रदंष्ट्रिणम्
कालादित्यसमाभासं दीर्घघोणं महास्वनम् ५७
ह्रस्वपादं विचित्रांगंजैत्रं दृढमनौपमम्
वाराहाकारमास्थाय गतवांस्तदधौ जवात् ५८
एवम्वर्षसहस्रं चरन्विष्णुरधो गतः
तथाप्रभृति लोकेषु श्वेतवाराहसंज्ञकः ५९
कल्पो बभूव देवर्षे नराणां कालसंज्ञकः
बभ्राम बहुधा विष्णुः प्रभविष्णुरधोगतः ६०
नापश्यदल्पमप्यस्य मूलं लिंगस्य सूकरः
तावत्कालं गतश्चोद्ध्र्वमहमप्यरिसूदन ६१
सत्वरं सर्वयत्नेन तस्यान्तं ज्ञातुमिच्छया
श्रान्तो न दृष्ट्वा तस्यांतमहं कालादधोगतः ६२
तथैव भगवान्विष्णुश्चांतं कमललोचनः
सर्वदेवनिभस्तूर्णमुत्थितस्समहावपुः ६३
समागतो मया सार्द्धं प्रणिपत्य भवं मुहुः
मायया मोहितश्शंभोस्तस्थौ संविग्नमानसः ६४
पृष्ठतः पार्श्वतश्चैव ह्यग्रतः परमेश्वरम्
प्रणिपत्य मया सार्धं सस्मार किमिदं त्विति ६५

अनिर्देश्यं च तद्रूपमनाम कर्मवर्जितम्
अलिंगं लिंगतां प्राप्तं ध्यानमार्गेप्यगोचरम् ६६
स्वस्थं चित्तं तदाकृत्वा नमस्कार परायणो
बभूवतुरुभावावामहं हरिरपि ध्रुवम् ६७
जानीवो न हि ते रूपं योऽसियोऽसि महाप्रभो
नमोऽस्तुते महेशान रूपं दर्शयनौत्वरन् ६८
एवं शरच्छतान्यासन्नमस्कारं प्रकुर्वतोः
आवयोर्मुनिशार्दूलमदमास्थितयोस्तदा ६९
इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखंडे
विष्णुब्रह्मविवादवर्णनो नाम सप्तमोऽध्यायः ७

ब्रह्मोवाच
एवं तयोर्मुनिश्रेष्ठ दर्शनं कांक्षमाणयोः
विगर्वयोश्च सुरयोः सदा नौ स्थितयोर्मुने १
दयालु रभवच्छंभुर्दीनानां प्रतिपालकः
गर्विणां गर्वहर्ता च सर्वेषां प्रभुरव्ययः २
तदा समभवत्तत्र नादो वै शब्दलक्षणः
ओमोमिति सुरश्रेष्ठात्सुव्यक्तः प्लुतलक्षणः ३
किमिदं त्विति संचिंत्य मया तिष्ठन्महास्वनः
विष्णुस्सर्वसुराराध्यो निर्वैरस्तुष्टचेतसा ४
लिंगस्य दक्षिणे भागे तथापश्यत्सनातनम्
आद्यं वर्णमकाराख्यमुकारं चोत्तरं ततः ५
मकारं मध्यतश्चैव नादमंतेऽस्य चोमिति
सूर्यमंडलवद्दृष्ट्वा वर्णमाद्यं तु दक्षिणे ६
उत्तरे पावकप्रख्यमुकारमृषि सत्तम

शीतांशुमण्डलप्रख्यं मकारं तस्य मध्यतः ७
तस्योपरि तदाऽपश्यच्छुद्धस्फटिकसुप्रभम्
तुरीयातीतममलं निष्कलं निरुपद्रवम् ८
निर्द्वंद्वं केवलं शून्यं बाह्याभ्यंतरवर्जितम्
स बाह्यभ्यंतरे चैव बाह्याभ्यंतरसंस्थितम् ९
आदिमध्यांतरहितमानंदस्यापिकारणम्
सत्यमानन्दममृतं परं ब्रह्म परायणम् १०
कुत एवात्र संभूतः परीक्षावोऽग्निसंभवम्
अधोगमिष्याम्यनलस्तंभस्यानुपमस्य च ११
वेदशब्दोभयावेशं विश्वात्मानं व्यचिंतयत्
तदाऽभवदृषिस्तत्र ऋषेस्सारतमं स्मृतम् १२
तेनैव ऋषिणा विष्णुर्ज्ञातवान्परमेश्वरम्
महादेवं परं ब्रह्म शब्दब्रह्मतनुं परम् १३
चिंतया रहितो रुद्रो वाचो यन्मनसा सह
अप्राप्य तन्निवर्तंते वाच्यस्त्वेकाक्षरेण सः १४
एकाक्षरेण तद्वाक्यमृतं परमकारणम्
सत्यमानन्दममृतं परं ब्रह्म परात्परम् १५
एकाक्षरादकाराख्याद्भगवान्बीजकोण्डजः
एकाक्षरादुकाराख्याद्धरिः परमकारणम् १६
एकाक्षरान्मकाराख्याद्भगवान्नीललोहितः
सर्गकर्ता त्वकाराख्यो ह्युकाराख्यस्तु मोहकः १७
मकाराख्यस्तु यो नित्यमनुग्रहकरोऽभवत्
मकाराख्यो विभुर्बीजी ह्यकारो बीज उच्यते १८
उकाराख्यो हरिर्योनिः प्रधानपुरुषेश्वरः
बीजी च बीजं तद्योनिर्नादाख्यश्च महेश्वरः १९

बीजी विभज्य चात्मानं स्वेच्छया तु व्यवस्थितः
अस्य लिंगादभूद्बीजमकारो बीजिनः प्रभोः २०
उकारयोनौ निःक्षिप्तमवर्द्धत समं ततः
सौवर्णमभवच्चांडमावेद्यं तदलक्षणम् २१
अनेकाब्दं तथा चाप्सु दिव्यमंडं व्यवस्थितम्
ततो वर्षसहस्रांते द्विधाकृतमजोद्भवम् २२
अंडमप्सु स्थितं साक्षाद्व्याघातेनेश्वरेण तु
तथास्यसुशुभं हिमं कपालं चोद्ध्र्वसंस्थितम् २३
जज्ञे सा द्यौस्तदपरं पृथिवी पंचलक्षणा
तस्मादंडाद्भवो जज्ञे ककाराख्यश्चतुर्मुखः २४
अ स्रष्टा सर्वलोकानां स एव त्रिविधः प्रभुः
एवमोमोमिति प्रोक्तमित्याहुर्यजुषां वराः २५
यजुषां वचनं श्रुत्वा ऋचः समानि सादरम्
एवमेव हरे ब्रह्मन्नित्याहुश्चावयोस्तदा २६
ततो विज्ञाय देवेशं यथावच्छक्तिसंभवैः
मंत्रं महेश्वरं देवं तुष्टाव सुमहोदयम् २७
एतस्मिन्नंतरेऽन्यच्च रूपमद्भुतसुन्दरम्
ददर्श च मया सार्द्धं भगवान्विश्वपालकः २८
पंचवक्त्रं दशभुजंगौरकर्पूरवन्मुने
नानाकांति समायुक्तं नानाभूषणभूषितम् २९
महोदारं महावीर्यं महापुरुषलणम्
तं दृष्ट्वा परमं रूपं कृतार्थोऽभून्मया हरिः ३०
अथ प्रसन्नो भगवान्महेशः परमेश्वरः
दिव्यं शब्दमयं रूपमाख्याय प्रहसन्स्थितः ३१
अकारस्तस्य मूर्द्धा हि ललाटो दीर्घ उच्यते

इकारो दक्षिणं नेत्रमीकारो वामलोचनम् ३२
उकारो दक्षिणं श्रोत्रमूकारो वाम उच्यते
ऋकारो दक्षिणं तस्य कपोलं परमेष्ठिनः ३३
वामं कपोलमूकारो लृ लॄ नासापुटे उभे
एकारश्चोष्ठ ऊर्द्ध्वश्च ह्यैकारस्त्वधरो विभोः ३४
ओकारश्च तथौकारो दन्तपंक्तिद्वयं क्रमात्
अमस्तु तालुनी तस्य देवदेवस्य शूलिनः ३५
कादिपंचाक्षराणयस्य पञ्च हस्ताश्च दक्षिणे
चादिपंचाक्षराणयेवं पंच हस्तास्तु वामतः ३६
टादिपंचाक्षरं पादास्तादिपंचाक्षरं तथा
पकार उदरं तस्य फकारः पार्श्व उच्यते ३७
बकारो वामपार्श्वस्तु भकारः स्कंध उच्यते
मकारो हृदयं शंभोर्महादेवस्य योगिनः ३८
यकारादिसकारान्ता विभोर्वै सप्तधातवः
हकारो नाभिरूपो हि क्षकारो घ्राण उच्यते ३९
एवं शब्दमयं रूपमगुणस्य गुणात्मनः
दृष्ट्वा तमुमया सार्द्धं कृतार्थोऽभून्मया हरिः ४०
एवं दृष्ट्वा महेशानं शब्दब्रहम तनुं शिवम्
प्रणम्य च मया विष्णुः पुनश्चापश्यदूर्द्ध्वतः ४१
ॐकारप्रभवं मंत्रं कलापंचकसंयुतम्
शुद्धस्फटिकसंकाशं शुभाष्टत्रिंशदक्षरम् ४२
मेधाकारमभूद्भूयस्सर्वधर्मार्थसाधकम्
गायत्रीप्रभवं मंत्रं सहितं वश्यकारकम् ४३
चतुर्विंशतिवर्णाढयं चतुष्कालमनुत्तमम्
अथ पंचसितं मंत्रं कलाष्टकसमायुतम् ४४

आभिचारिकमत्यर्थं प्रायस्त्रिंशच्छुभाक्षरम्
यजुर्वेदसमायुक्तं पञ्चविंशच्छुभाक्षरम् ४५
कलाष्टकसमा युक्तं सुश्वेतं शांतिकं तथा
त्रयोदशकलायुक्तं बालाद्यैस्सह लेहितम् ४६
बभूवुरस्य चोत्पत्तिवृद्धिसंहारकारणम्
वर्णा एकाधिकाः षष्टिरस्य मंत्रवरस्य तु ४७
पुनर्मृत्युंजयं मन्त्रं पञ्चाक्षरमतः परम्
चिंतामणिं तथा मंत्रं दक्षिणामूर्ति संज्ञकम् ४८
ततस्तत्त्वमसीत्युक्तं महावाक्यं हरस्य च
पञ्चमंत्रांस्तथा लब्ध्वा जजाप भगवान्हरिः ४९
अथ दृष्ट्वा कलावर्णमृग्यजुस्सामरूपिणम्
ईशानमीशमुकुटं पुरुषाख्यं पुरातनम् ५०
अघोरहृदयं हृद्यं सर्वगुह्यं सदाशिवम्
वामपादं महादेवं महाभोगीन्द्रभूषणम् ५१
विश्वतः पादवन्तं तं विश्वतोक्षिकरं शिवम्
ब्रह्मणोऽधिपति सर्गस्थितिसंहारकारणम् ५२
तुष्टाव वाग्भिरिष्टाभिस्साम्बं वरदमीश्वरम्
मया च सहितो विष्णुर्भगवांस्तुष्टचेतसा ५३

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां प्रथमखण्डे
सृष्ट्युपाख्याने शब्दब्रह्मतनुवर्णनो नामाष्टमोऽध्यायः ८

Credits

Source: *The Śivamahāpurāṇam*, (Delhi: Nag Publishers, 1986).

ईशानमीशमुकुटं पुरुषाख्यं पुरातनम् ॥४५
अघोरहृदयं हृदयं सर्वगुह्यं सदाशिवम् ।
वामापादं महादेवं महाभोगीन्द्रभूषणम ॥४६
विश्वतः पादवन्तं त विश्वतोऽक्षिकरं शिवम् ।
ब्रह्मणोऽधिपतिं सर्गस्थिति संहारकारणम् ॥४७
तुष्टाव वाग्भिरिष्टाभिः साम्बं वरदमीश्वरम् ।
मया च सहितो विष्णुर्भगवांस्तुष्टचेतसा ॥४८

फिर मृत्युंजय मंत्र अथवा त्र्यंबक मंत्र और इसके उपरान्त पंचाक्षर मंत्र (नमः शिवाय) व चिन्तामणि मंत्र और दक्षिणमूर्ति मंत्र को ग्रहण करे ।४३। 'तत्वमसि' शिवजी का महा वाक्य है । इन पाँचों मन्त्रों को ग्रहण कर भगवान् ने जप किया ॥४४॥ फिर ऋक्, यजु और साम रूपी कला वर्ण, जो ईशान, ईश मुकुट, पुरातन पुरुष हैं, उन्हें देखकर ॥४५॥ अघोर हृदय, सब में गुह्य, सदाशिव वामपाद महा-भोगीन्द्र एवं महादेव के भूषण को धारण करे ।४६। जिनके सभी ओर नेत्र हैं, जो ब्रह्माजी के अधीश्वर, सर्ग स्थित तथा संहार कर्त्ता हैं ।४७। साम्बशिव वर देने वाले हैं उनको वाणियों से संतुष्ट करने लगे । इस प्रकार मैंने विष्णुजी के सहित अत्यन्त प्रीतिपूर्वक उनकी स्तुति की ।४८।

※ हरिहर की अभेदता और परमशिवतत्व वर्णन ※

अन्यच्छृणु हरे विष्णो शासनं मम सुव्रत ।
सदा सर्वेषु लोकेषु मान्यः पूज्यो भविष्यसि ॥१
ब्रह्मणा निर्मिते लोके यदा दुःखं प्रजायते ।
तदा त्वं सर्व दुःखानां नाशाय तत्परो भव ॥२
रुद्रध्येयो भवांश्चैव भवद्ध्येयो हरस्तथा ।
युवयोरन्तरं नैव तव रुद्रस्य किंचन ॥३
वस्तुतश्चापि चैकत्वं वरतोऽपि तथैव च ।
लीलयापि महाविष्णो सत्यं सत्यं न संशयः ॥४
रुद्रभक्तो नरो यस्तु तव निन्दां करिष्यति ।
तस्य पुण्यं च निखिलं द्रुतं भस्म भविष्यति ॥५

नरके पतनं तस्य त्वद्द्वेषात्पुरुषोत्तम ।
मदाज्ञया भवेद्विष्णो सत्यं सत्यं न संशयः ॥६
त्वां यः समाश्रितो नूनं मामेव स समाश्रितः ।
अन्तरं यश्च जानाति निरये पतित ध्रुवम् ॥७
आयुर्बलं शृणुष्वाद्य त्रिदशातां विशेषतः ।
संदेहोऽत्र न कर्त्तव्यो ब्रह्माविष्णुहरात्मनाम् ॥८
त्वद्भक्तो यो भवेत्स्वामिन्मम् प्रियतरो हि सः ।
एवं वै यो बिजानाति तस्य मुक्तिर्न दुर्लभाः ॥९

परमेश्वर शिवजी ने कहा—हे विष्णो ! हे सुव्रत ! तुम मेरी आज्ञा श्रवण करो । तुम सदैव सभी लोकों में मान्य एवं पूजनीय होंगे ।१। ब्रह्माजी द्वारा रचे गये लोक में जब दुःख पड़ेगा तब तुम उस दुःख से लोकों को उबारने में तत्पर रहोगे ॥२॥ तुम दोनों को रुद्र का ध्यान करना उचित है । हे ब्रह्मा ! तुम्हारे ध्यान के योग्य विष्णु हैं, तुम दोनों में और रुद्र में कोई भेद नहीं है ।३। यथार्थ में तुम तीनों एक तत्व-रूप ही हो । हे विष्णो ! यह सब अंतर लीला मात्र का ही है, यथार्थ में नहीं है ।४। जो रुद्रभक्त तुम्हारा निन्दक हो, उसका सम्पूर्ण पुण्य नष्ट हो जाता है ॥५॥ हे पुरुषोत्तम ! हे विष्णो ! जो कोई तुमसे द्वेष करेगा, वह नरकगामी होगा, इसमें संशय नही है ।६। जो तुम्हारा आश्रय लेता है, वही मेरा आश्रित है, हम तुममें अन्तर समझने वाला अवश्य ही नरक को प्राप्त होगा ।७। तुम देवताओं के आयुर्बल को श्रवण करो । ब्रह्मा, विष्णु, और शिव के एकत्व में सन्देह नही करना चाहिये ॥८॥ ब्रह्मा, विष्णु ने कहा—हे स्वामिन् ! आपका कथन यथार्थ है । जो आपका भक्त होगा, वही मेरे लिये प्रिय होगा, जो इस प्रकार जानेगा उसके लिए मोक्ष दुर्लभ नहीं है ॥९॥

✻ शिव पूजन की विधि और उसका फल ✻

सूत सूत महाभाग व्यासशिष्य नमोऽस्तुते ।
श्रीविताऽद्यादभुता शैवी कथा परमपावनी ॥१

तत्राद्भुता महादिव्या लिंगोत्पत्तिः श्रुता शुभा ।
श्रुत्वा यस्याः प्रभावं दुःखनाशो भवेदिह ।२
ब्रह्मानारदसम्वादमनुसृत्य दयानिधे ।
शिवार्चनविधिं ब्रूहि येन तुष्टो भवेच्छिवः ।३
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्या पूज्यते शिवः ।
कथं कार्यं च तद् ब्रूहि यथा व्यासमुखाच्छ्रुतम् ।४
तच्छ्रुत्वा वचनं तेषां शर्मदं श्रुतिसम्मतम् ।
उवाच सकलं प्रीत्या मुनिप्रश्नानुसारतः ।५
साधु पृष्टं भवद्भिश्च तद्रहस्य मुनीश्वराः ।
तदहं कथयाम्यद्य यथाबुद्धि यथाश्रुतम् ।६
भवद्भिः पृच्छ्यते यद्वत्तथा व्यासेन वै पुरा ।
पृष्टं सनत्कुमाराय तच्छ्रुतं ह्युपमन्युना ।७
ततो व्यासेन वै श्रुत्वा शिवपूजादिकं च यत् ।
मह्यं च पठितं लोकानां हितकाम्यया ।८

ऋषियों ने कहा—हे सूतजी ! आपको ममस्कार है, आपने परम पावनी शिव कथा कही है ।१। उसमें अद्भुत दिव्य लिंग की उत्पत्ति सुनी, जिसके प्रभाव से इस लोक में दुःखों का क्षय होता है ।२। ब्रह्मा, और नारद के सम्वाद को स्मरण कर आप शिव की पूजा विधि कहिये, जिससे शिवजी संतुष्ट हो सकें ।२। ब्राह्मण, क्षत्रिय, वैश्य शूद्र यह सभी शिवजी की पूजा करते हैं, व्यासजी उसे किस प्रकार करने का उपदेश करते हैं, सो कहने की कृपा करें ।४। उनके ऐसे कल्याणप्रद तथा श्रुति-सम्मत वाक्य सुनकर सूतजी कहने लगे ।५। हे मुनियो ! आपने बड़ा उत्तम प्रश्न किया है । मैंने जैसा सुना है, वैसा ही कहता हूँ ।६। जो प्रश्न आपने किया है वही व्यासजी ने सनत्कुमार से किया था । जो उन्होंने कहा और उपमन्यु ने सुना था ।७। फिर शिवार्चन की सम्पूर्ण विधि लोकों के हितार्थ व्यासजी ने मुझे पढ़ाया ।८।

तच्छ्रुतं चैव कृष्णेन ह्युपमन्योर्महात्मनः ।
तदहं कथयिष्यामि यथा ब्रह्माऽब्रवदत्पुरा ।९